श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीपार्थसारथिदासेन कृतम्

# ॥ श्रीपद्मावतीस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीपद्मावतीस्तोत्रम् ॥

विष्णुपत्नि जगन्मातः विष्णुवक्षः स्थलस्थिते।
पद्मासने पद्महस्ते पद्मावति नमोऽस्तु ते॥ १ ॥

वेङ्कटेशप्रिये पूज्ये क्षीराब्धितनये शुभे।
पद्मे रमे लोकमातः पद्मावति नमोऽस्तु ते॥ २ ॥

कल्याणि कमले कान्ते कल्याणपुरनायिके।
कारुण्यकल्पलतिके पद्मावति नमोऽस्तु ते॥ ३ ॥

सहस्रदळपद्मस्थे कोटिचन्द्रनिभानने।
पद्मपत्रविशालाक्षि पद्मावति नमोऽस्तु ते॥ ४ ॥

सर्वज्ञे सर्ववरदे सर्वमङ्गळदायिनि।
सर्वसम्मानिते देवि पद्मावति नमोऽस्तु ते॥ ५ ॥

सर्वहृद्दहरावासे सर्वपापभयापहे।
अष्टैश्वर्यप्रदे लक्ष्मि पद्मावति नमोऽस्तु ते॥ ६ ॥

देहि मे मोक्षसाम्राज्यं देहि त्वत्पाददर्शनम्।
अष्टैश्वर्यं च मे देहि पद्मावति नमोऽस्तु ते॥ ७ ॥

नक्रश्रवणनक्षत्रे कृतोद्वाहमहोत्सवे।
कृपया पाहि नः पद्मे त्वद्भक्तिभरितान् रमे॥ ८ ॥

इन्दिरे हेमवर्णाभे त्वां वन्दे परमात्मिकाम्।
भवसागरमग्नं मां रक्ष रक्ष महेश्वरि॥ ९ ॥

कल्याणपुरवासिन्यै नारायण्यै श्रियै नमः।
श्रुतिस्तुति प्रगीतायै देवदेव्यै च मङ्गळम्॥ १० ॥

॥ इति श्रीपद्मावतीस्तोत्रम् समाप्तम् ॥